# Nakshatra Shanti Stotram

# નક્ષત્રશાન્તિસ્તોત્રમ્

## Document Information

Text title : nakShatrashAntistotram

File name : nakShatrashAntistotram.itx

Category : navagraha, stotra

Location : doc_z_misc_navagraha

Author : Traditional

Transliterated by : Gopal Upadhyay gopal.j.upadhyayat gmail.com

Proofread by : Gopal Upadhyay gopal.j.upadhyayat gmail.com

Latest update : October 20, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# નક્ષત્રશાન્તિસ્તોત્રમ્

કૃત્તિકા પરમા દેવી રોહિણી રુચિરાનના ॥ ૧॥

શ્રીમાન્ મૃગશિરા ભદ્રા આર્દ્રા ચ પરમોજ્જ્વલા ।
પુનર્વસુસ્તથા પુષ્ય આશ્લેષાऽથ મહાબલા ॥ ૨॥

નક્ષત્રમાતરો હ્યેતાઃ પ્રભામાલાવિભૂષિતાઃ ।
મહાદેવાऽર્ચને શક્તા મહાદેવાऽનુભાવિતઃ ॥ ૩॥

પૂર્વભાગે સ્થિતા હ્યેતાઃ શાન્તિં કુર્વન્તુ મે સદા ।
મઘા સર્વગુણોપેતા પૂર્વા ચૈવ તુ ફાલ્ગુની ॥ ૪॥

ઉત્તરા ફાલ્ગુની શ્રેષ્ઠા હસ્તા ચિત્રા તથોત્તમા ।
સ્વાતી વિશાખા વરદા દક્ષિણસ્થાનસંસ્થિતાઃ ॥ ૫॥

અર્ચયન્તિ સદાકાલં દેવં ત્રિભુવનેશ્વરમ્ ।
નક્ષત્રમારો હ્યેતાસ્તેજસાપરિભૂષિતાઃ ॥ ૬॥

મમાऽપિ શાન્તિકં નિત્યં કુર્વન્તુ શિવચોદિતાઃ ।
અનુરાધા તથા જ્યેષ્ઠા મૂલમૃદ્ધિબલાન્વિતમ્ ॥ ૭॥ var મૂલા ઋદ્ધિબલાન્વિતતા

પૂર્વાષાઢા મહાવીર્યા આષાઢા ચોત્તરા શુભા ।
અભિજિન્નામ નક્ષત્રં શ્રવણઃ પરમોજ્જ્વલઃ ॥ ૮॥

એતાઃ પશ્ચિમતો દીપ્તા રાજન્તે રાજમૂર્તયઃ ।
ઈશાનં પૂજયન્ત્યેતાઃ સર્વકાલં શુભાऽન્વિતાઃ ॥ ૯॥

મમ શાન્તિં પ્રકુર્વન્તુ વિભૂતિભિઃ સમન્વિતાઃ ।
ધનિષ્ઠા શતભિષા ચ પૂર્વાભાદ્રપદા તથા ॥ ૧૦॥

ઉત્તરાભાદ્રરેવત્યાવશ્વિની ચ મહર્ધિકા ।
ભરણી ચ મહાવીર્યા નિત્યમુત્તરતઃ સ્થિતાઃ ॥ ૧૧॥

શિવાર્ચનપરા નિત્યં શિવધ્યાનૈકમાનસાઃ ।

શાન્તિં કુર્વન્તુ મે નિત્યં સર્વકાલં શુભોદયાઃ ॥ ૧૨॥

ઇતિ નક્ષત્રશાન્તિસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by Gopal Upadhyay gopal.j.upadhyay at gmail.com

---

*Nakshatra Shanti Stotram*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*